This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No.
अनुक्रमाङ्कः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

Code No. 58/S/A
गूढसंख्या

Set
स्तबकः **A**

# SANSKRIT VYAKARAN
# संस्कृतव्याकरणम्
# (246)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ______________________

Signature of two Invigilators 1. ______________________
(निरीक्षकयोः हस्ताक्षरम्)
2. ______________________

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।
2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।
3 वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।
4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।
5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।
6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।
7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।

# SANSKRIT VYAKARAN

## संस्कृतव्याकरणम्

## (246)

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)] [पूर्णाङ्काः (Full Marks) : 100

निर्देशाः :

**(1)** अस्मिन् प्रश्नपत्रे [A] भागे **10**, [B] भागे **10**, [C] भागे **10** [D] भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

[A] दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) सूत्राणां कति प्रकाराः भवन्ति ?

(क) षट् (ख) पञ्चदश

(ग) चतुर्दश (घ) पञ्च

(2) बाह्यप्रयत्नस्य कति भेदाः सन्ति ?

(क) दश (ख) पञ्च

(ग) चत्वारः (घ) एकादश

(3) अयं वर्णः स्पर्शसंज्ञकः नास्ति ?

(क) च (ख) ट

(ग) द (घ) ह

(4) वान्तो यि प्रत्यये इति सूत्रस्य उदाहरणम् अस्ति ।

(क) गव्यम् (ख) मध्वरिः

(ग) रमेशः (घ) कृष्णैकत्वम्

(5) एङि पररूपम् इति कस्य सूत्रस्य अपवादसूत्रम् अस्ति ?

(क) वृद्धिरेचि (ख) एङः पदान्तादति

(ग) आद् गुणः (घ) एत्येधत्यूठसु

(6) परः इति सूत्रं भवति ।

(क) विधिसूत्रम् (ख) अधिकारसूत्रम्

(ग) नियमसूत्रम् (घ) अतिदेशसूत्रम्

(7) द्व्येकयोर्द्विवचनैकवचे इति सूत्रे कति पदानि सन्ति ?

(क) त्रीणि (ख) द्वे

(ग) पञ्च (घ) चत्वारि

(8) सप्तम्येकवचने विश्वपाशब्दस्य रूपं भवति ।

(क) विश्वपः (ख) विश्वपान्

(ग) विश्वपाः (घ) विश्वपि

(9) उक्तकारकाणि भवन्ति ।

(क) सप्त (ख) षट्

(ग) दश (घ) नव

(10) अनभिहिते कर्तरि का विभक्तिः भवति ?

(क) प्रथमा (ख) तृतीया

(ग) पञ्चमी (घ) द्वितीया

**[B]** दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत । **2×10=20**

(1) अवसानसंज्ञाविधायकं सूत्रं विलिख्य तस्य अर्थं लिखत । 1+1

(2) यथासंख्यमनुदेशः समानाम् इति परिभाषायाः अर्थं विलिख्य एकं प्रवृत्तिस्थलं लिखन्तु । 1+1

(3) वा पदान्तस्य इति सूत्रस्य अर्थम् उदाहरणं च लिखन्तु । 1+1

(4) सम्बुद्धिसंज्ञाविधायकं सूत्रं विलिख्य तस्य अर्थं लिखत । 1+1

(5) ज्ञानानि इत्यत्र नुमागमविधायकं सूत्रं विलिख्य तस्य अर्थं लिखत । 1+1

(6) माणवकः गुरोः वेदं पठति इत्यत्र गुरोः अपादानसंज्ञाविधायकं सूत्रं विलिख्य, तस्मात् पञ्चमीविधायकं सूत्रं लिखत । 1+1

(7) कालाध्वनोरत्यन्तसंयोगे इति सूत्रस्य अर्थम् उदाहरणं च प्रदर्शयन्तु । 1+1

(8) उक्ते कर्तरि का विभक्तिः भवति इति विलिख्य अनुक्ते कर्तरि का विभक्तिः भवति इति लिखत । 1+1

(9) पचो वः इति सूत्रस्य अर्थम् उदाहरणं च विलिखन्तु । 1+1

(10) पचमानः इत्यत्र मुगागमविधायकं सूत्रं विलिख्य तस्य अर्थं लिखत । 1+1

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) हलोऽनन्तराः संयोगः, विप्रतिषेधे परं कार्यम् इत्यनयोरेकं सूत्रं व्याख्यात ।

(2) उपसर्गाः क्रियायोगे, अपृक्त एकाल्प्रत्ययः इत्यनयोरेकं सूत्रं व्याख्यात ।

(3) प्रादयः. यू स्त्राख्यौ नदी इत्यनयोरेकं सूत्रं व्याख्यात ।

(4) उपैति, उपैधते इत्यनयोरेकं रूपं ससूत्रं साधयत ।

(5) रमायै, रमायाम् इत्यनयोरेकं रूपं ससूत्रं साधयत ।

(6) अतोऽम्, नपुंसकाच्च इत्यनयोरेकं सूत्रं व्याख्यात ।

(7) गुरुः शिष्यं धर्मं ब्रूते, गुरुः शिष्यं धर्मं शास्ति इत्यनयोः वाक्ययोः कस्यचिदेकस्य सिद्धिं लिखन्तु ।

(8) मैत्रः ओदनं भुञ्जानो विषं भुङ्क्ते, हरिः वैकुण्ठम् उपवसति इत्यनयोः वाक्ययोः कस्यचिदेकस्य वाक्यस्य सिद्धिं दर्शयन्तु ।

(9) कारकः, कर्ता इत्यनयोरेकं रूपं ससूत्रं साधयत ।

(10) मृजेर्विभाषा, एरच् इत्यनयोरेकं सूत्रं व्याख्यात ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) स्थानेन्तरतमः, यथासंख्यमनुदेशः समानाम् इत्यनयोरेकं सूत्रं व्याख्यात ।

(2) नश्चापदान्तस्य झलि, वा पदान्तस्य इत्यनयोरेकं सूत्रं व्याख्यात ।

(3) ङसिङ्योः स्मात्स्मिनौ, ङसिङसोश्च इत्यनयोरेकं सूत्रं व्याख्यात ।

(4) आतो धातोः, बहुवचने झल्येत् इत्यनयोरेकं सूत्रं व्याख्यात ।

(5) कर्मणा यमभिप्रैति स सम्प्रदानम्, स्वतन्त्रः कर्ता इत्यनयोरेकं सूत्रं व्याख्यात ।

---